# Shri Maheshvara Pratahsmaranam Pancharatnastotram

# શ્રીમહેશ્વરપ્રાતઃસ્મરણં એવં પઞ્ચરત્નસ્તોત્રમ્

## Document Information

Text title : Maheshvara PratahsmaraNa Pancharatna Stotram

File name : maheshvarapratAtaHsmaraNastotram.itx

Category : shiva, suprabhAta, pancharatna

Location : doc_shiva

Transliterated by : Malathi Ravi Kuduvaa

Proofread by : Malathi Ravi Kuduvaa, PSA Easwaran

Latest update : February 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2021

*sanskritdocuments.org*

# શ્રીમહેશ્વરપ્રાતઃસ્મરણં એવં પઞ્ચરત્નસ્તોત્રમ્

પ્રાતઃ સ્મરામિ પરમેશ્વરવક્ત્રપદ્મં
ફાલાક્ષલોલપરિશોષિતપઞ્ચબાણમ્ । (ફાલાક્ષિ કીલ)
ભસ્મત્રિપુણ્ડ્રરચિતં ફણિકુણ્ડલાઢ્યં
કુન્દેન્દુચન્દનસુધારસમન્દહાસમ્ ॥ ૧॥

પ્રાતર્ભજામિ પરમેશ્વરબાહુદણ્ડાન્
ખટ્વાઙ્ગશૂલહરિણાહિપિનાકયુક્તાન્ । (હરિણાઃ પિનાકરુક્તાન્)
ગૌરીકપોલકુચરઞ્જિતપુત્રરેખાન્ (પત્રરેખાન્)
સૌવર્ણકઙ્કણમણિદ્યુતિભાસમાનાન્ ॥ ૨॥ (ભાસમાનામ્)

પ્રાતર્નમામિ પરમેશ્વરપાદપદ્મં
પદ્મોદ્ભવામરમુનીન્દ્રમનોનિવાસમ્ ।
પદ્માક્ષનેત્રસરસીરુહપૂજનીયં
પદ્માઙ્કુશધ્વજવિસેવિત લાઞ્છનાઢ્યમ્ ॥ ૩॥ (પદ્માઙ્કુશધ્વજ સરોરુહ)

પ્રાતઃ સ્મરામિ પરમેશ્વરપુણ્યમૂર્તિં
કર્પૂરકુન્દધવલં ગજચર્મચેલમ્ ।
ગઙ્ગાધરં કનકમર્દવિભાસમાનં (ઘનકપર્દિ)
કાત્યાયનીતનુવિભૂષિતવામભાગમ્ ॥ ૪॥

પ્રાતઃ સ્મરામિ પરમેશ્વરપુણ્યનામ
શ્રેયપ્રદં સકલદુઃખવિનાશહેતુમ્ ।
સંસારતાપશમનં કલિકલ્મષઘ્નં
ગોકોટિદાનફલદં સ્મરણેન પુંસામ્ ॥ ૫॥

ઇતિ શ્રીમહેશ્વરપ્રાતઃસ્મરણપઞ્ચરત્નસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Malathi Ravi Kuduvaa
Proofread by Malathi Ravi Kuduvaa, PSA Easwaran

*Shri Maheshvara Pratahsmaranam Pancharatnastotram*

pdf was typeset on February 14, 2021

Please send corrections to *sanskrit@cheerful.com*